धनफलं, क्ली, ( धनानां फलम् । ) दानभोगादि । यथा, अग्निरुवाच ।
"अग्निहोत्रफला वेदा दत्तभुक्तफलं धनम् ।
रतिपुत्रफला दाराः शीलवृत्तफलं श्रुतम् ॥"
इति वह्निपुराणे दानविधिनामाध्यायः ॥

धनवती, स्त्री, (धनमस्या अस्तीति । धन + मतुप् । मस्य वः । स्त्रियां ङीप् । ) धनिष्ठानक्षत्रम् । इति जटाधरः ॥

धनवान्, [ त् ] त्रि, ( धनमस्यास्तीति । धन + मतुप् । मस्य वः । ) धनविशिष्टः । धनी । इति हलायुधः ॥ ( यथा, रामायणे ।२। ६७। १८।
"नाराजके जनपदे धनवन्तः सुरक्षिताः ।
शेरते विवृतद्वाराः कृषिगोरक्षजीविनः ॥")

धनस्यकः, पुं, गोक्षुरः । इति शब्दचन्द्रिका ॥ ( लालसया धनमिच्छतीति । धन + क्यच् । "सर्व्वप्रातिपदिकानां क्यचि लालसायां सुग-सुकौ ।" ३ । १ । ५१ । इत्यस्य वार्त्तिकोक्त्या सुक् । ततो धनस्य इति नामधातुः + ण्वुल् । लालसया धनेच्छौ, त्रि ॥ )

धनहरी, स्त्री, ( धनं हरतीति । हृ + "हरतेर-नुद्यमनेऽच् ।" ३ । २ । ९ । इति अच् । गौरा-दित्वात् ङीष् । ) चोरनामगन्धद्रव्यम् । तत्-पर्य्यायः । राक्षसी २ चण्डा ३ क्षेमः ४ दुष्पत्रः ५ गणहासकः ६ । इत्यमरः । २ । ४ । १२८ ॥ दुष्कुलीनः ७ विरोधः ८ क्रोधमूर्च्छितः ९ । इति शब्दरत्नावली ॥ क्षेमकः १० कितवः ११ कोरकः १२ । इति जटाधरः ॥ धनहारके ह्रन्तः, त्रि ॥

धनाधिपः, पुं, ( धनानामधिपः । ) कुवेरः । इत्य-मरः । १ । १ । ७२ ॥ ( यथा, देवीभागवते । ५ । ७ । १८ ।
"शङ्करं सम्परित्यज्य गते शक्रे शचीपतौ ।
यमो धनाधिपः पाशी जग्मुः सर्व्वे भयातुराः ॥")
अस्य ध्यानं यथा,—
"कुवेरञ्च प्रवक्ष्यामि कुण्डलाभ्यामलङ्कृतम् ।
हारकेयूररचितं सिताम्बरधरं शुभम् ॥
गदाधरञ्च कर्त्तव्यं वरदं मुकुटान्वितम् ।
नरयुक्तविमानस्थं मेषस्थं वापि कारयेत् ॥
वर्णेन पीतवर्णेन गुह्यकैः परिवारितम् ।
महोदरं महाकायं निध्यष्टकसमन्वितम् ॥
गुह्यकैर्बहुभिर्युक्तं धनव्यग्रकरैस्तथा ॥"
इति मत्स्यपुराणम् ॥

धनाध्यक्षः, पुं, ( धनानामध्यक्षः । ) कुवेरः । इति हलायुधः ॥ ( यथा, अध्यात्मरामायणे । ७ । २ । ४७ ।
"ततः क्रुद्धो दशग्रीवो जगाम धनदालयम् ।
विनिर्जित्य धनाध्यक्षं जहारोत्तमपुष्पकम् ॥")
धनाधिकृतः । तहविलदार इति खाजाञ्चि इति च भाषा । तस्य लक्षणं यथा,—
"लोहवस्त्राजिनादीनां रत्नानाञ्च विधानवित् ।
विज्ञाता फल्गुसाराणामनाहार्य्यः शुचिः सदा ।
निपुणश्चाप्रमत्तश्च धनाध्यक्षः प्रकीर्त्तितः ॥
आयद्वारेषु सर्व्वेषु धनाध्यक्षसमा नराः ।
व्ययद्वारेषु च तथा कर्त्तव्याः पृथिवीक्षिता ॥"
इति मत्स्यपुराणे १८९ अः ॥

धनाशा, स्त्री, ( धनानां आशा । ) धनलोभः । यथा, विष्णुपुराणे तथा हरिवंशे । ३० । ४६ ।
"जीर्य्यन्ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः ।
धनाशा जीविताशा च जीर्य्यतोऽपि न जीर्य्यति ॥"

धनाश्रीः, स्त्री, रागिणीविशेषः । धानसी इति भाषा । हनूमन्मते श्रीरागस्य तृतीयभार्य्या । अस्या जातिः षाड़वः । ग्रहं षड्जस्वरः । गान-समयः हिमर्त्तौ द्वितीयप्रहरः कस्यचिन्मते दिवावसानम् । रागमालायामस्या रूपं वियो-गिनी रमणी रक्तवसना विच्छेदवेदनया दुर्ब्बला कृशा च एकाकिनी वकुलवृक्षतलोपविष्टा रुदन्ती । कल्लिनाथमते मेघरागस्य चतुर्थ-भार्य्या । भरतमते मालकोषपुत्रगान्धाररागस्य पत्नी । इति सङ्गीतशास्त्रम् ॥

धनिकः, पुं, ( धनिना कायतीति । कै + कः । ) धन्याकम् । इति मेदिनी । के, १०६ ॥ अस्मि-न्नर्थे क्लीवमिति राजनिर्घण्टः ॥ ( धनमस्य-स्येति । ठन् । ) धवः । इति हेमचन्द्रः ॥

धनिकः, त्रि, (धनं अस्यस्येति । "अत इनिठनौ ।" ५।२।११५ । इति ठन् । ) साधुः । धनी । इति मेदिनी । के, १०६ ॥ (यथा, कलाविलासे ।९।१८।
"घूर्णकरकन्दुकानां वारवधूचरणनूपुरमणीनाम् ।
धनिकगृहोत्पन्नानां मुक्तिर्नास्त्येव मुग्धानाम् ॥"
उत्तमर्णः । यथा, मनुः । ८ । ४७ ।
"अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः ।
दापयेद्धनिकस्यार्थमधमर्णाद्विभावितम् ॥")

धनिका, स्त्री, ( धनिक + टाप् । ) साधुनारी । इति मेदिनी । के, १०६ ॥ वधूः । इति हेम-चन्द्रः ॥ युवती । इति शब्दरत्नावली ॥ प्रियङ्गु-वृक्षः । इति शब्दचन्द्रिका ॥

धनिष्ठा, स्त्री, ( अतिशयेन धनवती । धन + इष्ठन् + टाप् ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गत-त्रयोविंशनक्षत्रम् । तत्पर्य्यायः । श्रविष्ठा २ । इत्यमरः । १ । ३ । २२ ॥ वसुदेवता ३ । इति ज्योतिषम् ॥ भूतिः ४ निधानम् ५ धनवती ६ । इति जटाधरः ॥ अस्याः स्वरूपं यथा,—
"मस्तकोपरि समागते धने
मर्द्दलाकृतिनि पञ्चतारके ।
यान्ति कान्तिमति मेषलग्नतः
सारसाक्षिरसघस्रलिप्तिकाः ॥"
इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥
तत्र जातस्य फलम् ।
"आचारजातादरचारुशीलो
धनाधिशाली बलवान् दयालुः ।
यस्य प्रसूतौ च भवेद्धनिष्ठा
महत्प्रतिष्ठासहितो नरः स्यात् ॥"
इति कोष्ठीप्रदीपः ॥

धनी, [ न् ] त्रि, (धनमस्यास्तीति । धन + इनिः । ) धनवान् । (यथा, देवीभागवते । १ ।१५ ।१३।
"गत्वा च धनिनां कार्य्या स्तुतिः सर्व्वात्मना बुधैः ॥")
तत्पर्य्यायः । इभ्यः २ आढ्यः ३ । इत्यमरः । ३ । १ । १० ॥ यथा, कूर्म्मपुराणे १२० अः ।
"आढ्यो वा दीक्षितो नाम्ना यवीयानपि यो भवेत् ।
भो भवत्पूर्ब्बकन्त्वेनमभिभाषेत धर्म्मवित् ॥"
"एवं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते ।"
इति श्रीभागवतम् ॥
( उत्तमर्णः । यथा, मनुः । ८ । ६१ ।
"यादृशा धनिभिः कार्य्या व्यवहारेषु साक्षिणः ।
तादृशान् सम्प्रवक्ष्यामि यथावाच्यमृतञ्च तैः ॥")

धनीका, स्त्री, युवती । इति शब्दरत्नावली ॥

धनीयकं, क्ली, (धनाय हितम् । धन + छः । संज्ञायां कन् । ) धन्याकम् । इति शब्दरत्नावली ॥

धनुः, पुं, (धनतीति । धन + "भृमृशीतृचरीति ।" उणा । १ । ७ । इति उः । ) चापः । ( यथा, हितोपदेशे ।
"धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति ।")
राशिविशेषः । पियालवृक्षः । इति सिद्धान्त-कौमुद्यामुणादिवृत्तिः ॥

धनुः, [ स् ] पुं, ( धन + "अर्त्तिपृवपीति ।" उणा २ । ११८ । इति उसिः स च नित् । ) पियाल-वृक्षः । धनुर्धरे, त्रि । इति मेदिनी । से, २६ ॥

धनुः, [ स् ) क्ली, (धनतीति । धन शब्दे + "अर्त्ति-पृवपीति ।" उणा २ । ११८ । इति उसिः स च नित् ।) शरनिःक्षेपयन्त्रम् । धनुक इति भाषा । तत्पर्य्यायः । चापः २ धन्व ३ शरासनम् ४ कोदण्डम् ५ कार्म्मुकम् ६ इष्वासः ७ । इत्यमरः । २ । ८ । ८३ ॥ स्थावरम् ८ गुणी ९ शरावापः १० कृपता ११ त्रिणता १२ । इति त्रिकाण्ड-शेषः । अस्त्रम् १३ धनूः १४ । इति जटाधरः ॥ तारकम् १५ काण्डम् १६ । इति शब्दरत्ना-वली ॥ तस्य लक्षणं यथा,—
"धनुस्तु द्विविधं प्रोक्तं शार्ङ्गं वांशं तथैव च ।
कोमलं वर्णदृढता तयोर्गुण उदाहृतः ॥
सुखसम्पत्तिकरणं समसृष्टायतं धनुः ।
विपदो मुष्टिवैषम्ये तदङ्गे भङ्गमावहेत् ॥"
इति युक्तिकल्पतरुः ॥
धनुर्विद्यारम्भदिनं यथा,—
"शनिभौमबुधान्येषु वारेषु सुतिथौ हरौ ।
प्रबुद्धे चापविद्याया आरम्भः शुभदो मतः ॥"
इति ज्योतिःसारसंग्रहः ॥
विद्यारम्भोक्तनक्षत्राणि तत्र शुभानि ।
( एतदस्त्रविद्यां ब्रह्मा पृथुनाम्ने महीपतये प्रथमं दत्तवान् । असौ एव लोकेषु अस्याः प्रचारमकरोत् । यदुक्तम् वैशम्पायनेन ।
"असिः पूर्ब्बं मया सृष्टो दुष्टनिग्रहकारणात् ।
भवादृशसमीपस्थो लोकान् शिक्षन् चरत्यसौ ॥
धनुराद्यायुधश्रेष्ठ त्वमेवादिः स्मृतो मया ।